# Devaih Krita Devi Stuti

# देवैः कृता देवीस्तुतिः

## Document Information

Text title : Devaih Krita Devi Stuti 2

File name : devIstutiHdevaiHkRRitA2.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 53 - devakRitadevIstutiH | 9-22||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# Devaih Krita Devi Stuti

# देवैः कृता देवीस्तुतिः

(महिषासुरमर्दिनीस्तोत्रम्)
अयि गिरिनन्दिनि नन्दितमोदिनि विश्वविनोदिनि नन्दिनुते ।
गिरिवरविन्ध्यशिरोधिनिवासिनि शम्भुविलासिनि विष्णुनुते ॥ ९॥

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।
भगवति हे शितिकण्ठकुटुम्बिनि भक्तजनामितभूतिकृते ॥ १०॥

अयि निजहुङ्कृतिमात्रनिराकृतधूम्रविलोचनधूलिकृते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ११॥

समरविशोषितशोणितबीजसमुद्भवशोणितबीजलते ।
श्रीयुतशुम्भनिशुम्भमहाहवतर्पितभूतपिशाचतते ॥ १२॥

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।
अयि जगदम्ब कदम्बवनप्रियवासनिवासिनि सौधरते ॥ १३॥

शिखरिशिरोमणि तुङ्गहिमालयसौधनिजालयमध्यगते ।
मधुमधुरे मधुकैटभतर्जनजातससम्भ्रमब्रह्मनुते ॥ १४॥

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।
सुरघनघोषिणि दुर्धरघर्षिणि दुर्मुखहर्षिणि पोषरते ॥ १५॥

त्रिभुवनपोषिणि शङ्करतोषिणि कल्मषदूषिणि घोषरते ।
दनुजविशोषिणि दुर्मदरोषिणि सन्मुखपोषिणि सिह्मवहे ॥ १६॥

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।
धनुरनुषङ्गमनुक्षणसङ्गपरिस्फुटवङ्किनटत्कटके ॥ १७॥

कनक पिशङ्गनिषङ्गपृषत्करभटसङ्घहते ।
सुरसङ्घवचतुरङ्गबलक्षितिरङ्गघटद्रणरङ्गतटे ॥ १८॥

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।

अयि शिखण्डविखण्डनतुण्डवितृण्डितशुण्डगजौघकृते ॥ १९॥

रिपुगजगण्डगतोद्भटभण्डविदारणचण्डपराक्रमशौण्डमृगाधिपते ।
निजभुजदण्डविपाटितमुण्डनिवापितचण्डभटाधिपते ॥ २०॥

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ २१॥

जय जय देवि नगराजकुलोत्तारिणि कचकुचगमनजघनवदनकण्ठोदरकटि-
तटोरुद्वयकर बाहुभूषणविराजिते सजलजलदनगमातङ्गपुलिनेन्दुशङ्खकरतलसिह्मर -
म्भास्तम्भारक्तनीरजमृणालनिभे तारामलमौक्तिकसरकीलितकन्धरे बिम्बाधरे मध्या-
ष्टमीचन्द्रसमानभ्रूकृते तपनोडुपमण्डलायितताटङ्के उद्यत्कविमण्डलनिभनासामुक्ताम-
णिद्योतिते सर्वाभरणभूषिते त्वन्यायामोहितान् रक्ष रक्ष ॥ २२॥

॥ इति शिवरहस्यान्तर्गते माहेश्वराख्ये देवैः कृता देवीस्तुतिः ॥

- ॥ श्रीशिवरहस्यम् । माहेश्वराख्यः प्रथमांशः । अध्यायः ५३ - देवकृतदेवीस्तुतिः । ९-२२॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 53 - devakRRitadevIstutiH . 9-22..

Notes:
Deva-s देवाः eulogize Devī देवी as Mahiṣāsuramardini महिषासुरमर्दिनि and seek refuge at Her Feet.

Encoded and proofread by Ruma Dewan

*Devaih Krita Devi Stuti*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*